श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ८

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः
श्रीमते कृष्णाय परब्रह्मणे नमः
श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ८

*प्रलयवर्णनं जगत्सृष्टिप्रकारवर्णनं च*

एवं तावत् प्राकृतप्रक्षयान्ते
ब्राह्मे कल्पे ह्यादिमे लब्धजन्मा।
ब्रह्मा भूयस्त्वत्त एवाप्य वेदान्
सृष्टिं चक्रे पूर्वकल्पोपमानाम्॥ १ ॥

सोऽयं चतुर्युगसहस्रमितान्यहानि
तावन्मिताश्च रजनीर्बहुशो निनाय।
निद्रात्यसौ त्वयि निलीय समं स्वसृष्टै-
र्नैमित्तिकप्रलयमाहुरतोऽस्य रात्रिम्॥ २ ॥

अस्मादृशां पुनरहर्मुखकृत्यतुल्यां
सृष्टिं करोत्यनुदिनं स भवत्प्रसादात्।
प्राग्ब्राह्मकल्पजनुषां च परायुषां तु
सुप्तप्रबोधनसमास्ति तदाऽपि सृष्टिः॥ ३ ॥

पञ्चाशदब्दमधुना स्ववयोर्धरूप-
मेकं परार्धमतिवृत्य हि वर्ततेऽसौ।
तत्रान्त्यरात्रिजनितान् कथयामि भूमन्
पश्चाद्दिनावतरणे च भवद्विलासान्॥ ४ ॥

दिनावसानेऽथ सरोजयोनिः
सुषुप्तिकामस्त्वयि सन्निलिल्ये।
जगन्ति च त्वज्जठरं समीयु-
स्तदेदमेकार्णवमास विश्वम्॥ ५ ॥

www.prapatti.com

तवैव वेषे फणिराजि शेषे
    जलैकशेषे भुवने स्म शेषे।
आनन्दसान्द्रानुभवस्वरूपः
    स्वयोगनिद्रापरिमुद्रितात्मा॥ ६ ॥

कालाख्यशक्तिं प्रलयावसाने
    प्रबोधयेत्यादिशता किलादौ।
त्वया प्रसुप्तं परिसुप्तशक्ति-
    व्रजेन तत्राखिलजीवधाम्ना॥ ७ ॥

चतुर्युगाणां च सहस्रमेवं
    त्वयि प्रसुप्ते पुनरद्वितीये।
कालाख्यशक्तिः प्रथमप्रबुद्धा
    प्राबोधयत्त्वां किल विश्वनाथ॥ ८ ॥

विबुध्य च त्वं जलगर्भशायिन्
    विलोक्य लोकानखिलान् प्रलीनान्।
तेष्वेव सूक्ष्मात्मतया निजान्तः-
    स्थितेषु विश्वेषु ददाथ दृष्टिम्॥ ९ ॥

ततस्त्वदीयादयि नाभिरन्ध्रा-
    दुदञ्चितं किञ्चन दिव्यपद्मम्।
निलीननिश्शेषपदार्थमाला-
    सङ्क्षेपरूपं मुकुलायमानम्॥ १० ॥

तदेतदम्भोरुहकुड्मलं ते
    कलेबरात् तोयपथे प्ररूढम्।
बहिर्निरीतं परितः स्फुरद्भिः
    स्वधामभिर्ध्वान्तमलं न्यकृन्तत्॥ ११ ॥

सम्फुल्लपत्रे नितरां विचित्रे
    तस्मिन् भवद्वीर्यधृते सरोजे।



www.prapatti.com

स पद्मजन्मा विधिराविरासीत्
स्वयम्प्रबुद्धाखिलवेदराशिः॥ १२ ॥

अस्मिन् परात्मन् ननु पाद्मकल्पे
त्वमित्थमुत्थापितपद्मयोनिः।
अनन्तभूमा मम रोगराशिं
निरुन्धि वातालयवास विष्णो॥ १३ ॥

**********

www.prapatti.com